# A-II/1/1395/22

## तृतीयसत्रार्द्धम्

## प्रथमपत्रम्

## बौद्धदर्शनम्

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे अतिलघूत्तरीया: प्रश्ना: समाधेया:।** **(15×2=30)**

1. तत्त्वसंग्रहशब्दार्थपरीक्षायां कति कारिका: ?

2. तत्त्वसंग्रहकार: केन महाविहारेण सम्बद्ध: आसीत् ?

**अथवा**

यदि तत्त्वसंग्रहकारस्य अन्ये ग्रन्था: स्यु: तर्हि तेषां नामानि लिखत।

3. तत्त्वसंग्रहस्य मङ्गलपद्यं लिखत।

**अथवा**

शब्दार्थपरीक्षाया: प्रथमकारिकां लिखत।

4. तत्त्वसंग्रहस्य टीकाकार: क: ?

5. वस्तूनां का धर्मता ? पाठ्यग्रन्थदिशा लिखत।

6. नैरात्म्यवाद: तत्त्वसंग्रहदिशा स्वीक्रियते न वा ?

**अथवा**

विधिवादिन: के ?

7. प्रमेया: कति ? बौद्धदिशा सूचयत।

8. तद्भिन्नभिन्नत्वं के स्वीकुर्वन्ति ?

**अथवा**

सामान्यलक्षणं कस्य विषय: ? लिखत।

9. प्रत्यक्षस्य विषय: क: ? सूचयत।

10. प्रत्यक्षस्य यो हि विषय: तत् शब्दै: प्रतिपाद्यते न वा ? बौद्धदिशा लिखत।

11. शान्तरक्षितस्य देहावसानं कुत्र जातम् ?

12. भगवतो बुद्धस्य गोत्रः कः ?

13. अपोहस्य भेदद्वयं लिखत।

14. नैयायिकाभिमतं व्यक्त्याकृतिजातीनां शब्दार्थत्वम् बौद्धैः स्वीक्रियते न वा ?

15. तत्त्वसंग्रहः कस्य बौद्धसम्प्रदायस्य ग्रन्थः ?

**अथवा**

प्रतिषेधः कतिविधः ? नामानि लिखत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. स्वस्मृत्या पाठ्यांशतः एकां कारिकां विलिख्य सप्रसंगव्याख्या कुरुत।

17. ससन्दर्भव्याख्या कार्या –

तत्र स्वलक्षणं तावन्न शब्दैः प्रतिपाद्यते।
संकेतव्यवहाराप्तकालव्याप्तिवियोगतः॥

**अथवा**

घटादीनां च यत् कार्यं जलादेर्धारणादिकम्।
यच्च तद्विषयं ज्ञानं भिन्नं यद्यपि तद् द्वयम्॥

18. व्याख्यात–

यश्चापि क्षण उत्पन्नस्तद्बलेन तदापरः।
न तत्र समयाभोगः सादृश्यं च विकल्पितम्॥

**अथवा**

तथाहि द्विविधोऽपोहः पर्युदासनिषेधतः।
द्विविधः पर्युदासोऽपि बुद्ध्यात्मार्थात्मभेदतः॥

19. सप्रसंगव्याख्या करणीया –

येऽन्येऽन्यथैव शब्दार्थानस्त्यर्थादीन् प्रचक्षते।
निरस्ता एव तेऽप्येतैस्तथापि पुनरुच्यते॥

**अथवा**

बुद्ध्याकारोऽपि शब्दार्थः प्रागेव विनिवारितः।
ज्ञानादव्यतिरिक्तस्य व्यापकत्ववियोगतः॥

20. सम्यग्तया व्याख्यात–

असत्योपाधि यत्सत्यं तद्वा शब्दनिबन्धनम्।

शब्दो वाऽप्यभिजल्पत्वमागतो याति वाच्यताम्॥

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. शब्दार्थपरीक्षायाः सारम् अधिकृत्य निबन्धमेकं लिखत।

**अथवा**

बौद्धदर्शने शान्तरक्षितस्य योगदानं प्रतिपादयत।

**अथवा**

बौद्धदर्शने तत्त्वसंग्रहग्रन्थस्य महत्त्वं विवेचयत।

# A-II/2/1396/22

## तृतीयसत्रार्द्धम्

## द्वितीयपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. प्रमाणवार्तिककारः कः?
2. बौद्धनये कति प्रमाणानि? कानि च तानि?
3. प्रमाणवार्तिकस्य मङ्गलाचरणं लिखत।
4. प्रमाणवार्तिकं कस्य ग्रन्थस्य वार्तिकमस्ति?
5. बौद्धमते प्रमेयानि कति? कानि च तानि?
6. 'अज्ञातार्थप्रकाशो वा' इत्यस्य तात्पर्यं किम्? पाठ्यग्रन्थदिशा स्पष्टीकुरुत।

**अथवा**

कः तायी? पाठ्यग्रन्थदिशा लिखत।

7. प्रमाणवार्तिकस्य टीकाकारः कः? कस्यापि एकस्य नामोल्लेखं कुरुत।
8. कल्पना का? पाठ्यग्रन्थदिशा लिखत।

**अथवा**

नैरात्म्यज्ञानं कतिविधम्? नामानि लिखत।

9. संवृतिसत्यं किम्? लिखत।
10. प्रमाणवार्तिकं कस्य बौद्धदर्शनसम्प्रदायस्य ग्रन्थः?

**अथवा**

न्यायबिन्दुकारः कः?

11. सत्कायदृष्टिः निरूपणीया।

**अथवा**

सुगतः कः? बौद्धदिशा सूचयत।

12. 'प्रमाणमविसंवादिज्ञानम्' इत्यस्य अर्थ: लेखनीय:।

13. आचार्यधर्मकीर्ते: अपरे ग्रन्था: के? नामानि लिखत।

14. कतिविधप्रमाणै: वार्तिककारेण बुद्धभगवति प्रामाण्यं निरूपितम्?

**अथवा**

दु:खसत्यस्य आकाराणि कति? नामानि लिखत।

15. सत्यं कतिविधम्? बौद्धदिशा नामोल्लेखकपूर्वकं सूचयत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. पाठ्यग्रन्थात् कारिकामेकां स्वस्मृत्या विलिख्य व्याख्यात, या प्रश्नपत्रेऽत्र नागता स्यात्।

17. सप्रसङ्गं व्याख्यात –

प्रामाण्यं व्यवहारेण, शास्त्रं मोहनिवर्तनम्।

अज्ञातार्थप्रकाशो वा, स्वरूपाधिगते: परम्॥

**अथवा**

प्रमाणतत्त्वसिद्ध्यर्थम्, अनुमानेऽप्यवारणात्।

प्रयोगदर्शनाद्वाऽस्य, यत् किञ्चिदुदयात्मकम्॥

18. यथामति विवेचयत –

नित्यं प्रमाणं नैवास्ति प्रामाण्यात्, वस्तुसद्गते:।

ज्ञेयानित्यतया तस्या अध्रौव्यात्, क्रमजन्मनात्॥

**अथवा**

य: पश्यत्यात्मानं तत्रास्याहमिति शाश्वत: स्नेह:।

स्नेहात् सुखेषु तृष्यति तृष्णा दोषां स्तिरस्कुरुते॥

19. अधीतग्रन्थनयेन 'सुगतत्वाद् भगवान् प्रमाणम्' इति निरूप्यताम्।

20. प्रसङ्गपूर्वकं व्याख्यात –

प्रमाणमविसंवादिज्ञानम्, अर्थक्रियास्थितिः।

अविसंवादनम्, शाब्देप्यभिप्रायनिवेदनात्॥

**अथवा**

एकाभावाद् विना बीजं नांकुरस्येव सम्भवः।

असम्भवाद् विपक्षस्य न हानिः कर्मदेहयोः॥

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. न्यायक्षेत्रे आचार्यधर्मकीर्तेः अवदानमधिकृत्य निबन्धमेकं लिखत।

**अथवा**

प्रमाणवार्तिकस्य प्रमाणसिद्धिपरिच्छेदस्य प्रतिपाद्यविषयं? विवृणुत।

**अथवा**

बौद्धन्यायस्य वैशिष्ट्यं प्रतिपादयत।

# A-II/3/1397/22

## तृतीयसत्रार्द्धम्

## तृतीयपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. बुद्धयानं कतिविधम्?

**अथवा**

शून्यवादस्य अपरनाम किम्?

2. माध्यमिकदर्शनस्य प्रवर्तकः कः?

3. गतागतपरीक्षायां गमनक्रियायाः सिद्धिः जायते असिद्धिर्वा? पाठ्यग्रन्थदिशा सूचयत।

4. कस्य निरोधात् भवनिरोधः?

**अथवा**

भावाः कस्माद् द्वाभ्यां नोत्पद्यन्ते?

5. प्रत्ययाः कति? नामानि लिखत।

6. सौगताः कर्मफलं स्वीकुर्वन्ति न वा?

**अथवा**

प्रथमधर्मचक्रप्रवर्तनं कुत्र जातम्?

7. प्रतीत्यसमुत्पादस्य अष्टौ विशेषणानि कानि? नामानि लिखत।

8. आवरणद्वयं किम्? लिखत।

9. पाठ्यग्रन्थस्य द्वितीय-परीक्षायां कति कारिकाः सन्ति?

10. माध्यमिककारिकायाः चन्द्रकीर्तिप्रणीतायाः टीकायाः किं नाम?

**अथवा**

सौगतशब्दस्य का व्युत्पत्तिः?

11. पञ्चस्कन्धान् लिखत।

12. सर्वधर्मनिःस्वभावः कस्य दर्शनस्य सिद्धान्तः? कश्च तद्दर्शनस्य प्रवर्तकः?

**अथवा**

जातिप्रत्ययात् किम् भवति?

13. मध्यमकशास्त्रे कति परीक्षाः सन्ति?

14. माध्यमिककारिकायाः मङ्गलाचरणं लिखत।

15. आत्मपरीक्षायाम् आत्मनः सिद्धिः जायते असिद्धिर्वा?पाठ्यग्रन्थदिशा सूचयत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. स्वस्मृत्या पाठ्यग्रन्थस्य एकां कारिकां विलिख्य व्याख्या कार्या। सा कारिका प्रश्नपत्रेऽस्मिन् नागता स्यात्।

17. व्याख्यात–

न हि स्वभावो भावानां प्रत्ययादिषु विद्यते।
अविद्यमाने स्वभावे परभावो न विद्यते॥

**अथवा**

न च व्यस्तसमस्तेषु प्रत्ययेष्वस्ति तत्फलम्।
प्रत्ययेभ्यः कथं तच्च भवेन्न प्रत्ययेषु यत्॥ –व्याख्यात।

18. व्याख्या कार्या –

गम्यमानस्य गमने प्रसक्तं गमनद्वयम्।
येन तद्गम्यमानं च यच्चात्र गमनं पुनः॥

**अथवा**

गन्ता न गच्छति तावदगन्ता नैव गच्छति।
अन्यो गन्तुरगन्तुश्च कस्तृतीयो हि गच्छति॥ –व्याख्यां कुरुत।

19. सप्रसङ्गव्याख्या कार्या –

निर्ममो निरहंकारो यश्च सोऽपि न विद्यते।
निर्ममं निहंकारं यः पश्यति न पश्यति॥

**अथवा**

अपरप्रत्ययं शान्तं प्रपञ्चैरप्रपञ्चितम्।
निर्विकल्पमनानार्थमेतत्तत्त्वस्य लक्षणम्॥ –साधुतया व्याख्यात।

20. सप्रसङ्गं व्याख्यात-

कर्मक्लेशक्षयान्मोक्षः कर्मक्लेशा विकल्पतः।

ते प्रपञ्चात्प्रपञ्चस्तु शून्यतायां निरुध्यते॥

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. माध्यमिकदर्शनस्य वैशिष्ट्यम् अभिलक्ष्य निबन्धमेकं विशदीकुरुत।

**अथवा**

बौद्धदर्शनस्येतिहासे नागार्जुनस्य योगदानं प्रतिपादयत।

**अथवा**

माध्यमिकशास्त्रस्य आत्मपरीक्षायाः सारमधिकृत्य निबन्धमेकं लिखत।

# A-II/4/1398/22

## तृतीयसत्रार्द्धम्

## चतुर्थपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. बोधिचर्यावतारस्य तात्पर्यं किम्?
2. बोधिचर्यावतारस्य प्रथमपरिच्छेदस्य नाम किम्?
3. बोधिसत्त्वः कः?
4. पारमिताशब्दस्य कोऽर्थः?
5. संवृत्तिः का? ग्रन्थदिशा सूचयत।

**अथवा**

कः सततं फलति? पाठ्यग्रन्थदिशा सूचयत।

6. बोधिचर्यावतारस्य मङ्गलपद्यं लिखत।
7. 'बोधिचित्तस्य संसारेऽपि फलं महत्' इत्यस्य आशयं लिखत।
8. पुरुषार्थसाधनी का?

**अथवा**

जिनात्मजः कः?

9. 'तथागतः' इत्यस्य कोऽर्थः?
10. 'बोधिः' इत्यस्य कोऽभिप्रायः?
11. बोधिचित्तं कतिविधम्? तेषां नामानि लिखत।
12. 'सुगतान् ससुतान् सधर्मकायान्' इत्यत्र 'सुगतान्' इत्यस्य कोऽर्थः?
13. प्रज्ञोत्पादनस्य उद्देश्यं किम्?

**अथवा**

महायानस्य उद्देश्यं लिखत।

14. 'भुसुक:' इति कस्योपाधि: ?

**अथवा**

कति रत्नानि ? कानि च तानि ? पाठ्यग्रन्थदिशा लिखत।

15. 'क्षणसम्पदियं सुदुर्लभा' इत्यस्य कोऽभिप्राय: ?

**अथवा**

'तेषां शरीराणि नमस्करोमि' इत्यत्र शास्त्रकार: केषान् प्रति नमस्करोति ?

**ब. सर्वे लघूत्तरीया: प्रश्ना: समाधेया:।** **(5×6=30)**

16. बोधिचर्यावतारस्य मङ्गलाचरणं लिखत।

17. तद्बोधिचित्तं द्विविधं............इतीमां कारिकां पूरयित्वा ग्रन्थोक्तदिशा साधु व्याख्यात।

**अथवा**

भवचारकबन्धनो वराक: सुगतानां सुत उच्यते क्षणेन।
सनरामरलोकवन्दनीयो भवति स्मोदित एव बोधिचित्ते॥
–अस्या: कारिकाया: सन्दर्भसहिता व्याख्या विधेया।

18. सप्रसङ्गं व्याख्यात –
क्षणसम्पदियं सुदुर्लभा प्रतिलब्धा पुरुषार्थसाधनी।
यदि नात्र विचिन्त्यते हितं पुनरप्येष समागम: कुत:॥

**अथवा**

तेषां शरीराणि नमस्करोमि यत्रोदितं तद्वरचित्तरत्नम्।
यत्रापकारोऽपि सुखानुबन्धी सुखाकराँस्तान् शरणं प्रयामि॥

19. प्रसङ्गपूर्वकं सम्यक्तया विवेचयत –
अशुचिप्रतिभामिमां गृहीत्वा जिनरत्नप्रतिमां करोत्यनर्धाम्।
रसजातमतीव वेधनीयं सुदृढं गृह्णत बोधिचित्तसंज्ञम्॥

**अथवा**

हिताशंसनमात्रेण बुद्धपूजा विशिष्यते।
किं पुन: सर्वसत्त्वानां सर्वसौख्यार्थमुद्यमात्॥

20. स्वपाठ्यग्रन्थात् कारिकामेकां (या अत्र प्रश्नपत्रे नागता स्यात्) विलिख्य –व्याख्यात।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. चर्यासन्दर्शनशास्त्रेषु बोधिचर्यावतारग्रन्थस्य अवदानं महत्त्वं च लिखत।

**अथवा**

आचार्यशान्तिदेवस्य परिचयपूर्वकं माध्यमिकदर्शने तेषामवदानं लिखत।

**अथवा**

पाठ्यांशस्य बोधिचित्तानुशंसापरिच्छेदस्य तात्पर्यमभिलक्ष्य निबन्धमेकं लिखत।

# A-II/5/1399/22

## तृतीयसत्रार्द्धम्

## पञ्चमपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. आचार्यकमलशीलः कः?
2. माध्यमिकस्य प्रवर्तकः कः?
3. तत्त्वसङ्ग्रहः कस्य बौद्धदर्शनसम्प्रदायस्य ग्रन्थः?
4. उपादानस्कन्धाः के? लिखत।
5. त्रिविधां वेदनां लिखत।
6. तृष्णा प्रत्ययात् किम्?
7. प्रमाणवार्तिकस्य लेखकः कः?
8. स्वस्मृत्या धम्मपदस्य एकां गाथां लिखत।

**अथवा**

बौद्धतर्कभाषाकारः कः?

9. प्रमाणसमुच्चयस्य रचनाकारः कः?

**अथवा**

सुत्तपिटकस्य खुद्दकनिकाये कति ग्रन्थाः सन्ति?

10. स्वलक्षणं कस्य प्रमाणस्य विषयः?
11. 'विज्ञप्तिमात्रतसिद्धिः' कस्य रचना?

**अथवा**

'अविसंवादिज्ञानं प्रमाणं' केन आचार्येण लिखितम्?

12. कति वैपुल्यसूत्राणि? त्रयाणां नामानि लिखत।

**अथवा**

प्रथमसङ्गीतिः कदा कुत्र च संजाता?

13. अभिधम्मपिटके कति ग्रन्थाः सन्ति ?

14. योगाचारसम्प्रदायस्य अपरनाम किम् ?

**अथवा**

अनुपिटकसाहित्यस्य ग्रन्थद्वयस्य नामोल्लेखं कुरुत।

15. भगवतो बुद्धस्य जन्मस्थानं लिखत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. माध्यमिकसम्प्रदायस्य वैशिष्ट्यवर्णनं कुरुत।

**अथवा**

विज्ञानवादस्य परिचयो देयः।

17. तृतीयधर्मसंङ्गीत्यां किं जातमासीत् ? लिखत।

18. द्वादशायतनानि कानि ? प्रतिपादयत।

**अथवा**

प्रत्यक्षं कतिविधम् ? बौद्धन्यायदिशा व्याख्यात।

19. आर्याष्टाङ्गिगकमार्गस्य वर्णनं कुरुत।

20. आर्यसत्यस्य स्वरूपं लिखत।

**अथवा**

धम्मपदस्य महत्त्वं प्रतिपादयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. सौत्रान्तिकदर्शनस्य वैशिष्ट्यं प्रतिपादयत।

**अथवा**

त्रिपिटकस्य परिचयो देयः।

**अथवा**

प्रतीत्यसमुत्पादस्य द्वादशाङ्गस्य सम्यग् वर्णनं कुरुत।